वेल्लयेद्वेल्लनेनैता यथैका पर्पटी भवेत् । ततश्छुरिकया तान्तु सलग्नामेव कर्त्तयेत् । ततस्तु वेल्लयेद्भूयः शष्कुलीन च लेपयेत् । शालिचूर्णं घृतं तोयं मिश्रितं शष्कुलं वदेत् । ततः संहृत्य तल्लोपत्रीं विदधीत पृथक् पृथक् । पुनस्तां वेल्लयेल्लोपत्रीं यथा स्यात्खण्डजाकृतिः । ततस्तां सुपचेदाज्ये भवेयुश्च पुटाः स्फुटाः । सुगन्धया शर्करया तदुद्धूलनमाचरेत् । सिद्धैषा फेनिका नाम्ना मण्डकेन समा गुणैः । ततः किञ्चिल्लघुरियं विशेषोऽयमुदाहृतः । वेल्लयेत् प्रसारयेत् वेल्लनम् (वेलन) इति लोके । पर्पटी रोटी । लोपत्री (लाइ) इति लोके ।

अथ शष्कुली(सोहाली) इति लोके । समिताया घृताक्ताया लोपत्रीं कृत्वा च वेल्लयेत् । आज्ये तां भर्जयेत्सिद्धां शष्कुली फेनिकागुणा ।

अथ मोदकः (लाड्डू) । घृताक्तया समितया कृत्वा स्थूलाणि तानि तु । निपुणो भर्जयेदाज्ये खण्डपाकेन योजयेत् । युक्तेन मोदकान् कुर्य्यात् ते गुणैर्मण्डका यथा ।

अथ मुद्गमोदकः (मोतिचुरलाड्डू) । मुद्गानां धूमसीं सम्यक् घोलयेन्निर्मलाऽम्बुना । कटाहस्थघृतेष्वूर्द्धं झर्झरं स्थापयेत्ततः । धूमसीन्तु द्रवीभूतां प्रक्षिपेत् झर्झरोपरि । पतन्ति विन्दवस्तस्मात् तान् सुपक्वान् समुद्धरेत् । सितापाकेन संयोज्य कुर्य्याद्धस्तेन मोदकान् । झर्झरं (झाझरा) इति लोके । लघुर्ग्राही त्रिदोषघ्नः स्वादुः शीतो रुचिप्रदः । चक्षुष्यो ज्वरहृद्बल्यस्तर्पणो मुद्गमोदकः ।

अथ सेवनमोदकः(सेओकालड्ड्आ) । एवमेव प्रकारेण कार्य्याः सेवनमोदकाः । ते बल्या लघवः शीता किञ्चिद्वातकरास्तथा । विष्टम्भिनो ज्वरघ्नाश्च पित्तरक्तकफापहाः

दुग्धकूपिका । तण्डुलचूर्णं विमिश्रितनष्टक्षीरेण सान्द्रपिष्टेन । दृढकूपिकां विदध्यात्ताञ्च पचेत्सर्पिषा सम्यक् । अथ तां पूरितमध्यां घनपयसा पूर्णगर्भाञ्च । शष्कुलमुद्रितवदनां सर्पिषि सुपक्ववदनाञ्च । अथ पाण्डुखण्डपाके स्नापयेत् कर्पूरवासिते कुशलः । अथ दुग्धकूपिका सा बल्या पित्तानिलापहा कथिता । हृष्या शीता गुर्वी शुक्रकरी बृंहणी रुच्या । निदधाति कायपुष्टिं दृष्टिं दूरप्रसारिणीं सुचिरम् ।

कुण्डलिनी (जिलेबी) नूतनं घटमानीय तस्यान्तः कुशलो जनः । प्रस्थाद्धचूर्णं समानेन प्रास्थेन प्रलेपयेत् । द्विप्रस्थं समितां तत्र दध्यम्लं प्रस्थसम्मितम् । घृतमर्द्धं शरावञ्च घोलयित्वा घटे क्षिपेत् । आतपे स्थापयेत्तावद्यावद्याति तदम्लताम् । ततस्तत्प्रक्षिपेत्पात्रे सच्छिद्रे भाजने तु तत् । परिभ्राम्य परिभ्राम्य तत्सन्तप्ते घृते क्षिपेत् । पुनः पुनस्तदावृत्त्या विदध्यान्मण्डलाकृतिम् । तां सुपक्वां घृतान्नीत्वा सितापाके तनुद्रवे । कर्पूरादि सुगन्धञ्च स्नापयित्वोद्धरेत्ततः । एषा कुण्डलिनी नाम्ना पुष्टिकान्तिबलप्रदा । धातुवृद्धिकरी वृष्या रुच्या च क्षिप्रतर्पणी ।

अथ पञ्चामृतविशेषा रसाला । (शिखरिणी) आदौ माहिषमस्नात्ममम्बुरहितं दध्याढकं शर्करां शुभ्रां प्रस्थयुगोन्मितां शुचिपटे किञ्चिञ्च किञ्चित् क्षिपेत् । दुग्धेनार्द्धघटेन लघुमयनवत्स्थालग्रां दृढं सावयेत् एलाबीजलवङ्गचन्द्रमरिचैर्योग्यैश्च तद्योजयेत् । भीमेन प्रियभोजनेन रचिता नाम्ना रसाला स्वयम् श्रीकृष्णेन पुरा पुनः पुनरियं प्रीत्या समास्वादिता । एषा येन वसन्तवर्जितदिने संसेव्यते नित्यशः तस्य स्यादतिवीर्य्यवृद्धिरनिशं सर्व्वेन्द्रियाणां बलम् । ग्रीष्मे तथा शरदि ये रविशोषिताङ्गाः ये च प्रमत्तवनितासुरतातिखिन्नाः । ये चापि मार्गपरिसर्पणशीर्णगात्रास्तेषामियं वपुषि पोषणमाशु कुर्य्यात् । रसाला शुक्रला बल्या रोचनी वातपित्तजित् । दीपनी बृंहणी स्निग्धा मधुरा शिशिरा सरा । रक्तपित्तं तृषादाहं प्रतिश्यायं विनाशयेत् ।

अथ शर्करोदकम् (सरवत्) जलेन शीतलेनैव घोलिता शुभ्रशर्करा । एला लवङ्गकर्पूरमरिचैश्च समन्विता । शर्करोदकनाम्ना तत् प्रसिद्धं विदुषां सुखे । शर्करोदकमाख्यातं शुक्रलं शिशिरं सरम् । बल्यं रुच्यं लघु स्वादु वातपित्तप्रणाशनम् । मूर्च्छाच्छर्द्दितृषादाहज्वरशान्तिकरं परम् ।

अथ प्रपानकम् (पना) । तत्र आम्रफलप्रपानकम् । आम्रमामं जले खिन्नं मर्द्दितं दृढपाणिना । सिताशीताम्बुसंयुक्तं कर्पूरमरिचान्वितम् । प्रपानकमिदं श्रेष्ठं भीमसेनेन निर्मितम् । सद्यो रुचिकरं बल्यं शीघ्रमिन्द्रियतर्पणम् ।

अथाम्लिकाफलपानकम् । अम्लिकायाः फलं पक्वं मर्द्दयेत् वारिणा दृढम् । शर्करामरिचैर्मिश्रं लवङ्गेन्दुसुवासितम् । अम्लिकाफलसम्भूतं पानकं वातनाशनम् । पित्तश्लेष्मकरं किञ्चित् सुरुच्यं वह्निबोधनम् ।

निम्बूकफलपानकम् । भागैकं निम्बुजं तोयं षड्भागं शर्करोदकम् । लवङ्गमरिचैर्मिश्रं पानं पानकमुत्तमम् । निम्बूफलभवं पानमत्यम्लं वातनाशनम् । वह्निदीप्तिकरं रुच्यं समस्ताहारपाचकम् ।